**Sri Sathya Sai Books and Publications Trust,**
**Prasanthi Nilayam.**

# श्री रुद्रम्

## 10th Anuvaka

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।

drāpe andhasaspate daridrannīlaloohita|

एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत् ।

eṣām puruṣāṇāmeṣāṁ paśūnāṁ mā bhermā'ro mo eṣāṁ kiñcanāmamat |

या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी ।

yā te rudra śivā tanūḥ śivā viśvāhabheṣajī|

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥

śivā rudrasya bheṣajī tayā no mṛḍa jīvase||

इमागं रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् ।

imāgṁ rudrāya tavase kapardine kṣayadvīrāya prabharāmahe matim|

यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥

yathā naḥ śamasaddvipade catuṣpade viśvaṁ puṣṭaṁ grāme asminnanāturam||

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।

mṛḍā no rudrota no mayaskṛdhi kṣayadvīrāya namasā vidhema te|

यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥

yacchaṁ ca yośca manurāyaje pitā tadaśyāma tava rudra praṇītau||

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।

Mā no mahāntamuta mā no arbhakaṁ mā na ukṣantamuta mā na ukṣitam|

मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः।

mā no'vadhīḥ pitaraṁ mota mātaraṁ priyā. mā  nastanuvo rudra rīriṣaḥ|

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।

mā nastoke tanaye mā na āyuṣi mā no goṣu mā no aśveṣu rīriṣaḥ|

वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते ।

vīrānmā no rudra bhāmito'vadhīrhaviṣmanto namasā vidhema te |

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु।

ārātte goghna uta pūruṣaghne kṣayadvīrāya sumnamasme te astu|

रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ।

rakṣā ca no adhi ca deva brūhyadhā ca naḥ śarma yaccha dvibarhāḥ |

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्।

stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛganna bhīmamupahatnumugram|

मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः ।

mṛḍā jaritre rudra stavāno anyante asmannivapantu senāḥ।

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मति रघायोः ।

pariṇo rudrasya hetirvṛṇaktu pari tveṣasya durmati raghāyoḥ।

अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥

ava sthirā maghavadbhayastanuṣva mīḍhvastokāya tanayāya mṛḍaya।।

मीढुष्टम शिवतम शिवो नः सुमना भव ।

mīḍhuṣṭama śivatama śivo naḥ sumanā bhava। parame vṛkṣa

परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥

āyudhannidhāya kṛttiṁ vasāna ācara pinākaṁ bibhradāgahi।।

विकिरिद् विलोहित नमस्ते अस्तु भगवः ।

vikirida vilohita namaste astu bhagavaḥ।

यास्ते सहस्रगं हेतयोन्यमस्मन्निवपन्तु ताः ।

yāste sahasragṁ hetayonyamasmannivapantu tāḥ ।

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।

sahasrāṇi sahasradhā bāhuvostava hetayaḥ।

तासामीशानो भगवः पराचीना मुखा कृधि ॥१० ॥

tāsāmīśāno bhagavaḥ parācīnā mukhā kṛdhi **||10||**